Vol 8, Issue 5, 2025 **Impact Factor: 8.535** DOI: https://doi.org/10.31426/ijamsr.2025.8.5.8318

**International Journal of**
**Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

# ऋक्प्रातिशाख्यवर्णितस्य पिङ्गलच्छन्दःसूत्रवर्णितस्य च बृहतीछन्दसः तुलनात्मकं समीक्षणम्

# A Comparative Study on Brihati Metre between Rikprātiśākhya and Pingalachandahsutra

**Sunanda Bishnu, Dr. Laxminarayan Pandey**

Department of Sanskrit, Mansarovar Global University, Sehore, M.P., India.

**संक्षिप्तसारः -**

साक्षात्कृतधर्मैर्भारतीयमणीषाभिरध्यात्मशास्त्रानुभूततत्त्वस्य फलं खलु विशालो विमलः शब्दराजिर्वेदः । ***वेदोऽखिलो धर्ममूलम्*** ।[1] मन्त्रब्राह्मणात्मकः[2] सः वेदो न केवलं भारतीयवाङ्मयेष्वेव समादृतः, अपि तु विश्वसाहित्याकाशेऽपि स्वकीयया अप्रतिमप्रतिभया देदीप्यमानः सन् राराजते । ***इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः*** इति वेदभाष्यकार-सायणाचार्यराद्धान्तः ।[3] विश्वसाहित्ये सर्वतः प्राचीनतमो ग्रन्थः वेद एव ऐहिकामुष्मिकोभयविधश्रेयःसाधनस्य धर्मस्य तत्फलं दातुरीश्वरस्य च प्रकाशकः । मानवसंस्कृतेः प्राचीनतमं स्वरूपं विकासश्च वेदस्य परिशीलनेनैव निश्चेतुं शक्यते । समस्तेऽपि जगतीतले भारतस्य महती प्रतिष्ठा वेदमाश्रित्यैवास्ति । मानवजातेरितिवृत्तस्य आधुनिकभाषाविज्ञानस्य च स्वरूपं वेदाध्ययनेनैव परिशील्यते । इदमपि सत्यमतिरोहितमेवास्ति यद् शिक्षादिषडङ्गानां तथा षड्वेदाङ्गानां मौलिकानुशीलनं, पर्यालोचनं, मननं चान्तरेण वेदानां रहस्यं ज्ञातुमशक्यमेव । एतेषु शिक्षादिषु षड्वेदाङ्गेषु छन्द एव वेदपुरुषस्य पदरूपेण कल्पितम् । तदेव वेदस्य पञ्चमङ्गम‍् आस्ते ।

वैदिकसाहित्ये छन्दःशास्त्रस्योपरि अतीव महत्त्वपूर्णो ग्रन्थ एव आचार्यपिङ्गलविरचितः *पिङ्गलच्छन्दःसूत्रम्* । ऋग्वेदीयप्रातिशाख्येऽपि ग्रन्थस्यास्य अन्तिमे पटलत्रये (षोडशतोऽष्टादशपटलपर्यन्तम्) वैदिकछन्दस

[1] मनु. - 2.6

[2] मन्त्रब्राह्मणयोर्वेदनामधेयम् (आपस्तम्ब-यज्ञपरिभाषासूत्रम् – 2.6.3)

[3] ऐतरेयब्राह्मणे सायणाचार्यकृता भाष्यभूमिका

I J A M S R
**International Journal of**
**Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

आलोचना समुपस्थापिता । द्वयोर्ग्रन्थयोरेतयोः परिवेशित‌ेषु गायत्र्यादिषु सप्तसु वैदिकछन्द‌ःसु बृहतीछन्दसः तुलनात्मकसमीक्षा एव गवेषणापत्रस्यास्य विषय एवेति ॥

**सूचीमुखशब्दाः संक्षिप्तसारः, अवतरणिका, ऋक्प्रातिशाख्यस्य परिचयः, पिङ्गलच्छन्दःसूत्रस्य परिचयः, बृहतीशब्दस्य व्याख्या, ऋक्प्रातिशाख्यस्य बृहतीच्छन्दः, पिङ्गलच्छन्दःसूत्रस्य बृहतीच्छन्दः, ऋक्प्रातिशाख्यस्य- पिङ्गलच्छन्दःसूत्रवर्णितस्य बृहतीछन्दसः तुलनात्मकं समीक्षणम्, उपसंहारः, शब्दसंक्षेपसूची, ग्रन्थपञ्जी**

## अवतरणिका –

वेदार्थ‌ावबोधनाय आविर्भूतेषु शिक्षादिषु वेदाङ्गेषु छन्दो नाम वेदाङ्ग वेदपुरुषस्य गतिकारकमङ्गस्थानं पादस्थानमिति[4] वर्तते । छन्दसस्तत्त्वमपरिज्ञाय वैदिकसाहित्यस्य य‌ाथातथ्येन परिज्ञानमसम्भवमेव । ***छन्दोहीनो न शब्दोऽस्ति, न छन्दः शब्दवर्जितम्*** - इति नाट्यशास्त्रकृद्भरतार्यस्य मतमिति पूर्वे उल्ल‌िखितम् । *ऋकसर्वानुक्रमणी*- ग्रन्थानुसारेण छन्दो नाम ***यदक्षरपरिमाणं तच्छन्दः***[5] इति । शब्दस्यास्य छन्दसो व्युत्पत्तिप्रदर्शनावसरे उच्यते ***चन्दयति आह्लादयति चन्दतेऽनेन वा*** । *चदि आह्लादे दीप्तौ च* - इति भ्वादिगणीयेन परस्मैपदीयेन सेट्-धातुना सह *इदितो नुम् धातोः*[6] इति सूत्रानुसारेण नुमागमः । चन्द्यते अनेनेति वेति विग्रहे *चन्दोरादेश्च छः*[7] - इति उणादिसूत्रेण असुनि प्रत्यये कृते सति आदिवर्णस्य च-कारस्य छ-कारे कृते च छन्दः शब्दोऽयं निष्पद्यते । तैत्तिरीयसंहितायाम् ऋषिणोक्तम् - ***ते छन्दोभिरात्मानं छादयित्वोपायँस्तच्छन्दसां छन्दस्त्वम्***[8] इति । दैवतब्राह्मणे उक्तम‌् - ***छन्दांसि छन्दयतीति वा***[9] इति । ***छन्द्यांसि छादनात्***[10] इति यास्काचार्यकृतं निर्वचनम् ।

---

[4] छन्दः पादौ तु वेदस्य (पा.शि. - 41)

[5] ऋक्सर्वा. – 2.6

[6] पा. – 7.1.58

[7] उ. - 658

[8] तै.सं. – 5.6.6.1

[9] दै.ब्रा. – 1.3

[10] नि. – 7.12

Vol 8, Issue 5, 2025 **Impact Factor: 8.535** DOI: https://doi.org/10.31426/ijamsr.2025.8.5.8318

I J A M S R

**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

छन्दःशास्त्रस्योत्पत्तिविषये *प्राकृतपिंगलः*-ग्रन्थस्य भाष्यकारः लक्ष्मीनाथभट्ट-महोदयः ग्रन्थारम्भे ग्रन्थस्य प्रथमश्लोकस्य भाष्ये किञ्चन विवरणं प्रदत्तवान्, यदेव ग्रन्थस्यास्य ग्रन्थकारेणापि सूचितम् । एकदा शेषनागः पिङ्गलनाम्ना ब्राह्मणरूपं धारयन् तस्यैकस्य फणस्योपरि स्थितस्य पृथिवीग्रहस्य विस्तारं द्रष्टुं पृथिव्यां प्रादुर्बभुवः । ज्ञात्वेदं तस्य प्रागरिः गरुडः तन्मार्गं बाधितवान् । ततः पलायनमार्गं विचिन्तयन् पिङ्गलः तं गरुडमवदत् यत् प्रतीक्षयतु किमिदमविज्ञातं तेन यत् खलु स एक महान् कविः? केवलं पश्यतु, कथं स अपरिमितमात्रायां मात्रिकसंयोजनानि लिखितुं शक्नोति । यदि स गरुडः तं पिङ्गलं पुनरावृत्तिकर्तुं लक्षयति तर्हि स तं तत्क्षणात् खादितुं शक्नोति । गरुडः तं पिङ्गलं समर्थयति, पिङ्गलोऽपि एकाक्षरतः षट्विंशत्यक्षराणि गृहीत्वा छन्दसः भिन्न-भिन्न-प्रस्तारप्रयोगेन रचयितुं प्रारब्धवान् । क्रमेण स तटं प्रति गत्वोदके कूर्दितवान्, त्यक्त्वा गरुडोऽपि भ्रान्तोऽभवत् । ततः परं छन्दोविज्ञानं जनैर्ज्ञायते ।

अस्माकं प्राचीनधर्मग्रन्थस्य वेदस्य नामान्तरं तु छन्दः (*छन्दस्*) इति, यतो हि वैदिकमन्त्राः छन्दोवद्धा एव । यजुर्वेदस्य कतिपयांशं विहाय सर्वे वेदाः छन्दोवद्धाः स्युः । तदर्थं ते *छन्दस्*-इति शब्देन व्यपदिश्यन्ते । वैयाकरण-पाणिनि-महोदयस्य रचनायां प्रायशः *छन्दस्*-इति शब्देन वेद-इत्यमगव्यते । न केवलं चतुर्षु वेदेष्वपि तु लौकिकसाहित्यैव छन्दःप्राचुर्यमकल्पनीयम् ।

एतदेव ज्ञायते यद्गायत्र्यादि विभागेन वैदिकछन्दांसि सप्तधा विभज्यन्ते । तानि च - गायत्री, उष्णिक, अनुष्टुप◌्, बृहती, पङक्तिः, त्र◌िष्टुप्, जगती च । छन्दःस्वेतेषु गायत्री एव अष्टाक्षरविशिष्टा, यथा परं परं तेषु छन्दःसु पूर्वस्मात् पूर्वस्मात् छन्दसः उत्तरमुत्तरं चतुर्भिरक◌्षरैर्भूयो भवति । तदुच्यते ***चतुर्भूयः परं परम्***[11] इति । अतएव गायत्री - अष्टाक्षरा; उष्णिक् – (८+४=१२) द्वादश◌ाक्षरा; अनुष्टुप् – (१२+४=१६) षोडशाक्षरा; बृहती - (१६+४=२०) विंशत्यक्षरा; पङक्तिः (२०+४=२४) - चतुर्विंशत्यक्षरा; त्रिष्टुप् (२४+४=२८) - अष्टाविंशत्यक्षरा; जगती (२८+४=३२) - द्वात्रिंशदक्षरविशिष्टा एवेति ।[12]

वेदेषु मन्त्राः प्रायश्छन्दोबद्धाः सन्ति । तेषां छन्दसां ज्ञानाय छन्दःशास्त्रस्य ज्ञानमनिवार्यं वर्तते । छन्दः शास्त्रविषयको मुख्योग्रन्थः पिङ्गलछन्दसूत्रमेव वर्तते । *छन्दोमञ्जरी, वृत्तरत्नाकरः* प्रभृतय अपि ग्रन्थाः छन्दःशास्त्रस्य ज्ञानायोपादेया सन्ति ।

---

[11] ऋक्प्रा. – 16.2

[12] अष्टाक्षरप्रभृतीनि (ऋक्प्रा., उ.भा. – 16.1)

Vol 8, Issue 5, 2025 **Impact Factor: 8.535** DOI: https://doi.org/10.31426/ijamsr.2025.8.5.8318

I J A M S R

**International Journal of**
**Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

निखिलेऽस्मिन् संस्कृतवाङ्मये छन्दःशास्त्रस्य द्वौ भेदौ स्तः - वैदिकछन्दांसि लौकिकछन्दांसि चेति। गायत्र्यादि विभागेन वैदिकछन्दांसि सप्तधा विभज्यन्ते। तानि च - गायत्री, उष्णिक, अनुष्टुप्, बृहती, पङ्क्तिः, त्रिष्टुप्, जगती च। उच्यते तर्हि –

***गायत्र्युष्णिगनुष्टुप् च बृहती च प्रजापतेः। पङ्क्तिस्त्रिष्टुब् जगती च सप्त छन्दांसि तानि ह ।।***[13] इति।

एतेषु सप्तसु छन्दःसु गायत्रीछन्दस आलोचना, ऋक्प्रातिशाख्यग्रन्थे पिङ्गलछन्दःसूत्रे च प्रतिपादितायाः बृहत्याः तुलनात्मकसमीक्षा चात्र यथामति परिवेशिता मया।

**ऋक्प्रातिशाख्यस्य परिचयः** –

ऋग्यजुस्सामाथर्वेषु चतुर्षु वेदेषु ऋग्वेदस्य प्रातिशाख्यम् एव *ऋक्प्रातिशाख्यम्* । ग्रन्थस्यास्य रचयिता एव आचार्यः शौनकः । ग्रन्थस्यास्य भाष्यकार उवटाचार्यः, भाष्यस्य नाम एव *उवटभाष्यम्* । प्रतिवेदस्य प्रातिशाख्यग्रन्थो विद्यते । तत्र पौर्वापर्यस्तु इत्थम् – 1. ऋग्वेदप्रातिशाख्यम् 2. तैत्तिरीयप्रातिशाख्यम् 3. वाजसनेयिप्रातिशाख्यम् 4. शौनकीया चतुरध्यायिका 5. ऋक्तन्त्रम् 6. अथर्ववेदप्रातिशाख्यम् इति।

ग्रन्थस्यास्य **प्रथमसंस्करणमेव** 1859 ख्रीष्टाब्दे **एम.ए.रेग्नियर**-महोदयेन प्रस्तूयते। तत्र ग्रन्थस्थितानां सूत्राणां फ्रेञ्च-अनुवादः कृतः, अपि च उवटभाष्यमवलम्ब्य सूत्राणां व्याख्याः अपि कृता तत्रभवता एम.ए.रेग्नियर-महोदयेन । ग्रन्थस्यास्य **द्वितीयसंस्करणमेव** 1869 ख्रीष्टाब्दे **मैक्समूलर**-महोदयेन प्रस्तूयते । तत्र ग्रन्थस्थितानां सूत्राणां जर्मान-अनुवादः कृतः, अपि च उवटभाष्यमवलम्ब्य सूत्राणां व्याख्याः अपि कृता तत्रभवता मैक्समूलर-महोदयेन। पुनः, ग्रन्थस्यास्य **तृतीयसंस्करणमेव** 1869 ख्रीष्टाब्दे **सत्यव्रतसामश्रमी**-महोदयेन प्रस्तूयते । पुनः, ग्रन्थस्यास्य **चतुर्थसंस्करणमेव** 1903 ख्रीष्टाब्दे उवटभाष्यसहितम् ऋक्प्रातिशाख्यस्य संस्करणं पण्डित-**युगलकिशेर-व्यास**-महोदयेन तच्छिष्येन पण्डित-**प्रभुदत्तशर्म**णा च कृतम् । पुनः, ग्रन्थस्यास्य **पञ्चमसंस्करणमेव** 1905 ख्रीष्टाब्दे उवटभाष्यसहितम् ऋक्प्रातिशाख्यस्य संस्करणं **हितव्रत-सामकण्ठ**-महोदयेन कलिकातातः कृतम्। तदनन्तरं डा. **मङ्गलदेव-शास्त्री** महोदयेन उवटभाष्यसहितस्य ऋक्प्रातिशाख्यस्य खण्डत्रयेण अत्युत्तमं संस्करणमेकं प्रकाशितम् । तत्र प्रथमे खण्डे प्रातिशाख्यस्यास्य कर्ता, भाषा, रचनाशैली आदि प्रतिपादिता । द्वितीये खण्डे उवटभाष्यसहितानि प्रातिशाख्यास्यास्य सूत्राणि समुल्लिखितानि । तृतीये खण्डे तु ग्रन्थस्यास्य आङ्गलभाषायाम् अनुवादः

[13] ऋक्प्रा. – 16.1

I J A M S R
International Journal of
Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281

टिप्पनी च सन्निवेशिता तत्रभवता ग्रन्थकारेण । तदनन्तरं 1930 ख्रीष्टाब्दे अध्यापक-**सिद्धेश्वर-भट्टाचार्य**-महोदयस्य उवट-भाष्य-सहितम् *ऋग्वेदप्रातिशाख्यम्* वाराणस्या: काशी हिन्दू विश्वविद्यालय शोध-प्रकाशनतः प्रकाशितोऽभूत् । तदनन्तरं अध्यापक-**वीरेन्द्रकुमाक-वर्मा**-महोदयेन अनुवादितं परिष्कृतम् उवटभाष्य-संवलितम् ऋद्वेदप्रातिशाख्यम् प्रकाशितं जातं चौखम्बा-संस्कृत-प्रतिष्ठानतः 1986 ख्रीष्टाब्दे । अध्यापक-**व्रजबिहारी-चौवे**-महोदय-प्रणीतम् *ऋग्वेगप्रातिशाख्य* (पटल १ – ४) भारतीय विद्या प्रकाशन, दिल्लीतः 1986 ख्रीष्टाब्दे प्रकाशितोऽभूत् । *शौनकीय ऋग्वेगप्रातिशाख्य* (प्रथमतश्चतुर्थपटलं यावत्, षोडशपटलञ्च) अध्यापक-**तारकनाथ-अधिकारी**-महोदयेन सम्पादितं कोलकातायाः संस्कृत-वुक-डिपोतः 2007 ख्रीष्टाब्दे । तत्परं, *शौनकविचरितम् ऋग्वेदप्रातिशाख्यम्, पशुपतिशास्त्रिकृतटीकासमेतम्* प्रकाशितं सम्पादकेन अनुवादकेन व्याख्याकारेण अध्यापक-**अमरकुमार-चट्टोपाध्याय**-महाभागेन कोलकातायाः संस्कृत-पुस्तक-भाण्डारतः 2008 ख्रीष्टाब्दे ।

सर्वेषामेव वेदानां सर्वेषु प्रातिशाख्येषु ऋग्वेदीयम् ऋक्प्रातिशाख्यं प्राचीनतानुसारेण प्रामाणिकतानुसारेण विषयविस्तारेण च शीर्षस्थानीयमस्ति । इदमेव ऋग्वेदस्य आश्वलायनशाखासम्बद्धम् । ग्रन्थस्यास्य विशेषता एव – **क)** ग्रन्थस्यास्य विषयवर्णनाप्रसङ्गे बहवः पारिभाषिकाः शब्दाः व्यवहृताः (प्रवादः, न्यायः, प्रतिकण्ठः, नियतः, प्रत्यय आदि) य एव अन्यत्र न दृश्यन्ते । **ख)** ग्रन्थेऽस्मिन् अष्टादश-पटलाः सन्ति । प्रतिपटलस्य विषयभेदेन पृथक्पृथक् नामानि सन्ति यदेवान्यत्र न प्राप्यते । **ग)** चतुर्दशपटले उच्चारण-दोषविषयकानि साङ्गोपाङ्ग-विवरणानि सन्ति, यदेवान्यत्र न दृश्यते । **घ)** ग्रन्थस्य रचना सूत्रैः विरचिता सत्यपि ग्रन्थस्य अस्पष्टता कृत्रिमता च नास्ति । **ङ)** ऋग्वेदस्य मन्त्रविषयकाः सर्वाः विशेषेताः प्रातिशाख्येनानेन प्रकाशिताः जाताः तत्रभवता ग्रन्थकारेण ।

**पिङ्गलच्छन्दःसूत्रस्य परिचयः** –

पिङ्गलच्छन्दःसूत्रम् इति ग्रन्थस्य रचयिता एव पिङ्गलाचार्यः । ग्रन्थस्यास्य मङ्गलाचरणेऽपि उक्तम् – ***श्रीमत्पिङ्गलनागोक्तच्छन्दःशास्त्रमहोदधौ*** [14] इति । अपि तु ***पिङ्गलाचार्यसूत्रस्य*** ...[15] इति ।

पिङ्गलाचार्य एव दाक्षीपुत्र इति मन्यते विद्वद्भिः । तन्त्राचार्यो भास्कराचार्यस्तस्य भाष्यराजः – इति ग्रन्थे पिङ्गलाचार्यस्य पितुर्नाम दाक्षी इति उल्लेखयामास –

***श्रीदाक्षीसरसीगर्भकन्दं पिङ्गलनालकम् । अध्यायाष्टकपत्राच्यं सूत्रकेसरभासुरम् ॥*** इति ।

[14] पिङ्ग. – मङ्गलाचरणम्, 1
[15] पिङ्ग. – मङ्गलाचरणम्, 2

आचार्य-चिन्तामणि-विर,तस्य छन्दःसार-ग्रन्थस्य वृत्तिकारः श्रीखण्डेणोऽपि तं दाक्षीपुत्रमिति मन्यते – दाक्षीपुत्रप्रणीतप्रतिथपृथुनहाशास्त्रशैलैकसिंहो बाजीरायाभिधोऽलङ्कृतिविषयजुषां शासको यत्पिताभुत् इति। वृत्तमढ्जरी-ग्रन्थस्य रचयिता धीरेश्वराचार्यः तस्य ग्रन्थे पिङ्गलाचार्यस्य प्रतिमूर्तमेकां निर्णयामास –

***अक्षसूत्रकरकाजिनोज्ज्वलः सोपवीतधृतमौञ्जमेखलः।***
***ज्वालपिङ्गलजटः सदग्रणीश्छान्दसो जयति पिङ्गलो मुनिः॥*** इति।

आसीत् पिङ्गलाचार्य एव वैयाकरणपाणिनेः भ्राता । आनुमानिकः 700-300 ख्रीष्टपूर्वाब्द एव तस्य पिङ्गलाचार्यस्य समयकाल इति मन्यते विद्वद्भिः।

पिङ्गलच्छन्दःसूत्रम् इति ग्रन्थस्य वृत्तिकार एव हलायुधः । तन्मते पिङ्गलाचार्यसूत्रं खलु वेदानां प्रथमाङ्गस्वरूपम्, कवीनां नयनस्वरूपञ्चेति – ***वेदानां प्रथमाङ्गस्य कवीनां नयनस्य च । पिङ्गलाचार्यसूत्रस्य ...***[16] इति। छन्दःशास्त्रेषु एतद्ग्रन्थ एवामृतायते। तदुक्तं वृत्तिकारेण हलायुधेन –

***क्षीराब्धेरमृतं यद्वदुद्धृतं देवदानवैः। छन्दोऽब्धेः पिङ्गलाचार्यश्छन्दोऽमृतं तथोद्धृतम्॥***[17] इति।

स पिङ्गलाचार्य एव शिवभक्त आसीत्। ग्रन्थस्यास्य मङ्गलाचरणे तेनैवोक्तम् –

***नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे। त्रैलोक्यनगरारम्भमूलस्तम्भाय सम्भवे॥***[18] इति।

मङ्गलाचरणस्यान्तिमे चोक्तम् – ***मयरसतजभनलगसम्मितं भ्रमति वाङ्मयं जगति यस्य।***
***स जयति पिङ्गलनागः शिवप्रसादाद्विशुद्धमतिः॥***[19] इति।

पिङ्गलचछन्दःसूत्रे अष्टाध्यायाः सन्ति। तत्र मङ्गलाचरणादनन्तरं प्रथमाध्याये लौकिकछन्दःशास्त्रस्य भादयो ये दश गणाः सन्ति ते सर्वे एवात्र समुल्लिख्यन्ते। यथा –

***त्रिगुरुं विद्धि मकारं लघ्वादिसमन्वितं यकाराख्यम्। लघुमध्यमञ्च रेफं सकारमन्ते गुरु निबद्धम्॥***
***लघ्वन्त्यं हि तकारं जकारमुभयोर्लघुं विजानीयात्। आदिगुरुञ्च भकारं नकारमिह पैङ्गले त्रिलघुम्॥***
***दीर्घं संयोगपरं तथा प्लुतं व्यञ्जनान्तमुष्मान्तम्। सानुस्वारञ्च गुरुं क्वचिदवसानेऽपि लघ्वन्त्यम्॥***
***आदिमध्यावसानेषु य-र-ता यान्ति लाघवम्। भ-ज-सा गौरवं यान्ति म-नौ तु गुरुलाघवम्।***

16 पिङ्ग. – मङ्गलाचरणम्, 2
17 पिङ्ग. – मङ्गलाचरणम्, 3
18 पिङ्ग. – मङ्गलाचरणम्,1
19 पिङ्ग. – मङ्गलाचरणम्, 4

IJAMSR
**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

***त्रिविरामं दशवर्णं षण्मात्रमुवाच पिङ्गलः सूत्रम् । छन्दोवर्गपदार्थप्रत्यहेतोश्च शास्त्रादौ ।।***[20] इति ।।

**बृहतीशब्दस्य व्याख्या –**

वैदिकसाहित्ये सप्तसु छन्दःसु बृहती एव चतुर्थतमा । बृद्ध्यर्थकात् बृह-धातोः बृहती-शब्दोऽयं निष्पन्नो जातः । तर्हि उच्यते यास्काचार्येण ***बृहती परिबर्हणात्***[21] इति । ***बृहती जागतस्त्रयश्च गायत्र्याः*** – इत्येव आचार्यपिङ्गलकृतं बृहती-लक्षणम् । यदा एको जागतः पादः (द्वादशाक्षराणि), त्रयश्च गायत्र्याः (3x8=24, चतुर्विंशत्यक्षराणि) तदा बृहती-नाम छन्दो भवति । अनुष्टुप्-छन्दांसि प्रतिपादम् अष्टाक्षराणि सन्ति । अतएव बृहती अनुष्टुभश्चतुर्भिरक्षरैः परिबृद्धा भवतीति तस्याः बृहत्याः बृहतीत्वमिति ।

**ऋक्प्रातिशाख्यस्य बृहतीच्छन्दः –**

बृहती-छन्दसो लक्षणनिरूपणावसरे तत्रभवती ऋग्वेदप्रातिशाख्यकारेण आचार्यशौनकेनोक्तम् –

***चतुष्पदा तु बृहती प्रायः षट्त्रिंशदक्षरा । अष्टाक्षरस्त्रयः पादातृतीयो द्वादशाक्षरः ।।*** [22] इति ।

आशयो यत्, बृहती षट्त्रिंशदक्षरविशिष्टा चतुष्पदा भवति । तस्याः त्रयः पादाः अष्टाक्षरविशिष्टा, एका तु द्वादशाक्षरविशिष्टा भवति । अर्थात् बृहतीछन्दः षट्त्रिंशदक्षरविशिष्टं (8+8+12+8 = 36) भवितुमर्हति । एषा बृहती प्रायेण प्रयुज्यते । उदाहरणं यथा – *मा चिदन्यद् वि शंसत* (8) *सखायो मा रिषण्यत* (8) *इन्द्रमित् स्तोता वृषणं सचा सुते* (12) *मुहुरुक्था च शंसत* (8) (ऋ. – 8.1.1) इति ।।

तस्य बृहती-छन्दसो बहुविभागाः सन्ति । तद्यथा – **पुरस्ताद्बृहती, उपरिष्टाद्बृहती, न्यङ्कुसारिणीबृहती** अथवा **स्कन्धोग्रीवीबृहती** अथवा **उरोबृहती, विराट् ऊर्द्ध्वोबृहती, विष्टारबृहती, पिपीलिकमध्यमाबृहती, विषमपदाबृहती** इति ।

**क) पुरस्ताद्-बृहती** – बृहतीछन्दसः चतुर्षु पादेषु यदि प्रथमे पादे द्वादशाक्षराणि सन्ति अवशिष्टेषु पादेषु अष्टाक्षराणि सन्ति तर्हि सा षट्त्रिंशदक्षरविशिष्टा (12+8+8+8 = 36) **पुरस्ताद्बृहती** भवति । सूत्रितं - ***पुरस्ताद्बृहती नाम प्रथमे द्वादशाक्षरे*** [23] इति । यथा – *महो यस्पतिः शचसो अस्याम्या (असामि + आ)* (12) *महो नृम्णस्य तूतुजिः* (8) *भर्ता वज्रस्य (वज्रसिय) धृष्णोः* (8) *पित्रा पुत्रमिव प्रियम्* (8) (ऋ. -10.22.3) इति ।।

---

[20] पिङ्ग. – मङ्गलाचरणम्, 5-9

[21] नि. – 7.12.12

[22] ऋक्प्रा. – 16.45

[23] ऋक्प्रा. – 16.46

Vol 8, Issue 5, 2025 **Impact Factor: 8.535** DOI: https://doi.org/10.31426/ijamsr.2025.8.5.8318

I J A M S R

**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

**ख) उपरिष्टाद्-बृहती -** बृहतीछन्दसः चतुर्षु पादेषु यदि अन्तिमे पादे द्वादशाक्षराणि सन्ति, अवशिष्टेषु पादेषु अष्टाक्षराणि सन्ति तर्हि सा षट्त्रिंशदक्षरविशिष्टा (8+8+8+12 = 36) **उपरिष्टाद्बृहती** भवति। सूत्रितं – ***उपरिष्टाद्बृहत्यन्ते*** [24] इति। यथा – *न तमंहो न दुरितं* (8) *देवासो अष्ट मर्त्यम्* (*मर्तियम्*) (8) *सजोषसो यमर्यमा* (8) *मित्रो नयन्ति वरुणो अति द्विषः* (12) (ऋ. – 10.126.1) इति॥

**ग) न्यङ्कुसारिणी-बृहती** अथवा **स्कन्धोग्रीवी-बृहती** अथवा **उरो-बृहती -** बृहतीछन्दसः चतुर्षु पादेषु यदि द्वितीये पादे द्वादशाक्षराणि सन्ति, अवशिष्टेषु पादेषु अष्टाक्षराणि सन्ति तर्हि सा षट्त्रिंशदक्षरविशिष्टा (8+12+8+8 = 36) **न्यङ्कुसारिणी-बृहती** भवति। अपरे तां **स्कन्धोग्रीवी** इति मन्यन्ते। **उरोबृहती** इत्यन्ये च। एवम् एनां त्रिधा प्रतिजानत आचार्याः। सूत्रितं – ***... द्वितीये न्यङ्कुसारिणी। स्कन्धोग्रीव्युरोबृहती त्रेधैनां प्रतिजानते*** [25] इति। यथा – *ईजानमिद् द्यौर्गूर्ताव-* (8) *सु रीजानं भूमिरभि प्रभूषणि* (12)। *ईजानं देवावश्विना-* (8) *वभि सुम्नैरवर्धताम्* (8) (ऋ. – 10.132.1) इति॥

**घ) विराट्-ऊर्ध्वोबृहती** – यस्याः बृहत्यास्त्रयः पादाः द्वादशाक्षरविशिष्टाः भवन्ति सा षट्त्रिंशदक्षरविशिष्टा (12+12+12 = 36) **विराट्-ऊर्ध्वोबृहती** नाम्ना वेदितव्या। सूत्रितं तु – ***त्रयो द्वादशका यस्याः सा होर्ध्वबृहती विराट्*** [26] इति। यथा – *अजीजनः अमृतः मर्त्येष्वा* (मर्त्येषु आ = *मर्तियेषु आ*) (12), *ऋतस्य धर्मन् अमृतस्य चारुणः* (12)। *सदासरो वाजमच्छा सनिष्यदत्* (12) (ऋ. – 10.110.4) इति॥

**ङ) विष्टार-बृहती** – अष्टिनोः पादयोर्मध्ये दशकौ यस्याः सा षट्त्रिंशदक्षरविशिष्टा (8+10+10+8 = 36) **विष्टारबृहती** नाम वेदितव्या। यथा – ***अष्टिनोर्दशकौ मध्ये विष्टारबृहती युवम्*** [27] इति। यथा – *युवं ह्यास्तं* (*हि + आस्तम्*) *महो रन्* (8), *युवं वा यन्निरततं सतम्* (10)। *ता नः वसू सुगोपा* (*सुऽगोपा*) *स्यातम्* (10) *पातं नो वृकादघायोः* (8) (ऋ. – 1.120.7) इति॥

**च) पिपीलिकमध्यमा-बृहती** – यस्याः त्रयोदशाक्षरयोर्मध्ये एकोऽष्टाक्षरः पादो भवति सा चतुस्त्रिंशदक्षरविशिष्टा (13+8+13 = 34) **पिपीलिकमध्यमा बृहती** वेदितव्या। सूत्रितं –

***त्रयोदशाक्षरौ च द्वौ मध्ये चाष्टाक्षरो भवेत्। अभि वो वीरमित्येषा सा पिपीलिकमध्यमा॥*** [28] इति।

---

[24] ऋक्प्रा. – 16.46

[25] ऋक्प्रा. – 16.46

[26] ऋक्प्रा. – 16.47

[27] ऋक्प्रा. – 16.49

[28] ऋक्प्रा. – 16.52

Vol 8, Issue 5, 2025 **Impact Factor: 8.535** DOI: https://doi.org/10.31426/ijamsr.2025.8.5.8318

IJAMSR

**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

यथा – *अभि वो वीरमन्धसो मदेषु गाय* (13) *गिरा महा विचेतसम्* (8) । *इन्द्रं नाम श्रुत्यं शाकिनं वचो यथा* (13) (ऋ. – 8.46.14) इति ॥

**छ) विषमपदा-बृहती** – यत्र नवाक्षरः प्रथमः पादः, द्वितीयचतुर्थौ च अष्टाक्षरविशिष्टौ, तृतीयपादश्च एकादशाक्षरविशिष्टो भवति, तत्र षट्त्रिंशदक्षरविशिष्टा (9+8+11+8 = 36) **विषमपदाबृहती** नाम वेदितव्या । सूत्रितं तर्हि – ***नवकाष्ट दश सहैकः परमोऽष्ट च यदि पादाः । बृहती विषमपदा सा सनितः सुसनितरुग्र ॥*** [29] इति । यथा - *सनितः सुसनितरुग्र* (9) *चित्र चेतिष्ठ सूनृत्* (8) *। प्रासहा सम्राट् सहुरिं सहन्तं* (11) *भुज्युं वाजेषु पूर्व्यम्* (*पूर्वियम्*) (8) (ऋ. – 8.46.20) इति ॥

कोष्ठेनैकेन बृहतीछन्दसः एते विभागाः ससूत्रोदाहरणं प्रदर्श्यन्ते –

| **नाम** | **लक्षणम्** | **अक्षरसंख्या** | **उदाहरणम्** |
|---|---|---|---|
| पुरस्ताद्बृहती | *पुरस्ताद्बृहती नाम प्रथमे द्वादशाक्षरे इति ।* | 12+8+8+8 = 36 | *महो यस्पतिः शवसो अस्याम्या* (*असामि + आ*) (12) *महो नृम्णस्य तूतुजिः* (8) *भर्ता वज्रस्य* (*वज्रसिय*) *धृष्णोः* (8) *पित्रा पुत्रमिव प्रियम्* (8) ॥ |
| उपरिष्टाद्बृहती | *उपरिष्टाद्बृहत्यन्ते* | 8+8+8+12 = 36 | *न तमंहो न दुरितं* (8) *देवासो अष्ट मर्त्यम्* (*मर्तियम्*) (8) *सजोषसो यमर्यमा* (8) *मित्रो नयन्ति वरुणो अति द्विषः* (12) ॥ |
| न्यङ्कुसारिणीबृहती अथवा स्कन्धोग्रीवीबृहती अथवा उरोबृहती | *... द्वितीये न्यङ्कुसारिणी । स्कन्धोग्रीव्युरोबृहती त्रेधैनां प्रतिजानते ।* | 8+12+8+8 = 36 | *ईजानमिद् द्यौर्गूर्ताव-* (8) *सु रीजानं भूमिरभि प्रभूषणि* (12) *। ईजानं देवावश्विना-* (8) *वभि सुम्नैरवर्धताम्* (8) ॥ |
| विराट्-ऊर्द्ध्वोबृहती | *त्रयो द्वादशका यस्याः सा होर्ध्वबृहती विराट् ।* | 12+12+12 = 36 | *अजीजनः अमृतः मर्त्येषु* (*मर्तियेषु*) *आ* (12), *ऋतस्य धर्मन् अमृतस्य चारुणः* (12) *। सदासरो वाजमच्छा सनिष्यदत्* (12) ॥ |
| विष्टारबृहती | *अष्टिनोर्दशकौ मध्ये विष्टारबृहती युवम् ।* | 8+10+10+8 = 36 | *युवं ह्यास्तं* (*हि + आस्तम्*) *महो रन्* (8), *युवं वा यन्निरततं सतम्* |

[29] ऋक्प्रा. – 16.53

I J A M S R
**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

| | | | |
|---|---|---|---|
| | | | (10) । *ता नः वसू सुगोपा (सुऽगोपा) स्यातम्* (10) *पातं नो वृकादघायोः* (8) ॥ |
| पिपीलिकमध्यमा-बृहती | *त्रयोदशाक्षरौ च द्वौ मध्ये चाष्टाक्षरो भवेत् । अभि वो वीरमित्येषा सा पिपीलिकमध्यमा ॥* | 13+8+13=34 | *अभि वो वीरमन्धसो मदेषु गाय* (13) *गिरा महा विचेतसम्* (8) । *इन्द्रं नाम श्रुत्यं शाकिनं वचो यथा* (13) ॥ |
| विषमपदा-बृहती | *नवकाष्ट दश सहैकः परमोऽष्ट च यदि पादाः । बृहती विषमपदा सा सनितः सुसनितरुग्र ॥* | 9+8+11+8 = 36 | *सनितः सुसनितरुग्र* (9) *चित्र चेतिष्ठ सूनृत्* (8) । *प्रासहा सम्राट् सहुरिं सहन्तं* (11) *भुज्युं वाजेषु पूर्व्यम्* (*पूर्वियम्*) (8) ॥ |

**पिङ्गलच्छन्दःसूत्रस्य बृहतीच्छन्दः -**

पिङ्गलच्छन्दःसूत्रानुसारेण बृहती-छन्दसो देवता एव बृहस्पतिः, स्वरस्तु मध्यमः, वर्णस्तु कृष्णः, गोत्रञ्च तस्याः अङ्गिरसम् इति । बृहती तु अष्टधा विभज्यते - आर्षी, दैवी, आसुरी, प्राजापत्या, याजुषी, साम्नी, आर्ची, ब्राह्मी चेति । तत्र दैवी-आसुरी-प्राजापत्या-बृहती मिलित्वा आर्षी-बृहती, याजुषी-साम्नी-आर्ची-बृहती मिलित्वा ब्राह्मी-बृहती समुपजायत इति पिङ्गलच्छन्दःसूत्रस्य ऋक्प्रातिशाख्यस्य चाशयः । चित्रेणैकेन तदवगमने सौविध्यं जातम् –

| छन्दः | बृहती | | छन्दः | बृहती |
|---|---|---|---|---|
| आर्षी | 36 | | याजुषी | 9 |
| दैवी | 4 | | साम्नी | 18 |
| आसुरी | 12 | | आर्ची | 27 |
| प्राजापत्या | 20 | | ब्राह्मी | 54 |

यदा एको जागतः (द्वादशाक्षरः) पादः, त्रयश्च गायत्र्याः (अष्टाक्षरः) पादाः, तदा षट्त्रिंशदक्षरविशिष्टा (12+8+8+8 = 36) बृहतीछन्दो भवतीति । ***गायत्र्याः वसवः***[30] इति सूत्रेण पिङ्गलच्छन्दःसूत्रे गायत्र्याः पादसंख्या निर्धारिता । गायत्र्याः पादो वसवोऽष्टाक्षराणि भवन्ति । ***जगत्या आदित्याः***[31] इति सूत्रेण जगत्याः पादो द्वादशाक्षराणि सन्ति । जागतगायत्रशब्दाभ्यामतः सर्वत्र द्वादशाक्षराष्टाक्षरयोर्ग्रहणं बोध्यम् इति । तदुच्यते

[30] पिङ्ग. – 3.3
[31] पिङ्ग. – 3.4

IJAMSR
International Journal of
Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281

***बृहती जागतस्त्रयश्च गायत्र्याः*** [32] इति । क्वचिद्वेदे नवाक्षराश्चत्वारः पादाः दृश्यन्ते, सापि षट्त्रिंशदक्षरविशिष्टा (9+9+9+9 = 36/ 4x9 = 36) बृहती भवति । तदर्थं सूत्रितं ***क्वचिन्नवकाश्चत्वारः***[33] इति । यथा – *तं त्वा वयं पितो वचोभिः* (9) *गावो न हव्या सुषूदिम* (9) । *देवेभ्यस्त्वा* (*देवेभियस्त्वा*) *सधमाद*-(9) *मस्मभ्यं* (*मस्मभियं*) *त्वा सधमादम्* (9) (ऋ. – 1.187.11) इति ।

अपि च, यत्र वैराजौ पादौ (दशाक्षरौ) भवतः ततो गायत्रौ (अष्टाक्षरौ) पादौ भवतः, स्यापि षट्त्रिंशदक्षरविशिष्टा (10+10+8+8 = 36) बृहती भवति । तर्हि सूत्रितं ***वैराजो गायत्रौ च*** [34] इति । यथा – *अग्ने विवस्वदुषसश्चित्रं* (10) *राधो अमर्त्य* (*अमर्तिय*) *आदुशषे* (10) । *जातवेदा वहत्व*- (*वहतुव*) (8) *मद्यादेवां उषर्बुधः* (8) (ऋ. – 1.44.1), (साम. – 1.40) इति ॥

पिङ्गलच्छन्दःसूत्रे पञ्चविधाः बृहत्या निरूपिताः । तद्यथा – **पथ्या-बृहती, न्यङ्कुसारिणी-बृहती अथवा स्कन्धोग्रीवी-बृहती अथवा उरोबृहती, उपरिष्टात्-बृहती, पुरस्तात्-बृहती, महाबृहती सतोबृहती वा** इति ।

**क) पथ्या-बृहती** – यदि कस्यचिच्छन्दस्य प्रथमपादे, द्वितीयपादे, चतुर्थपादे तथा अन्त्यपादे गायत्र्याः, तृतीये च जागत्याः पादो भवति, अर्थात् प्रथम-द्वितीय-चतुर्थे पादे अष्टाक्षराः, तृतीये च द्वादशाक्षराः सन्ति, तदा षट्त्रिंशदक्षरविशिष्टा (8+8+12+8 = 36) **पथ्या-बृहती** भवति । तदर्थं सूत्रितं ***पथ्या पूर्वश्चेत्तृतीयः***[35] इति । यथा – *मा चिदन्यद्वि शंसत* (8) *सखायो मा रिषण्यत* (8) । *इन्द्रमित् स्तोता वृषणं स चासु ते* (12) *मुहुरुक्था च शंसत* (8) (ऋ. – 8.1.1), (साम. – 1.242) इति ॥

**ख) न्यङ्कुसारिणी-बृहती** - यदि छन्दस्यो द्वितीयपादो जागतः पादस्तथा द्वादशाक्षरविशिष्टो भवति, शेषास्तथा प्रथम-तृतीय-चतुर्थपादाः गायत्र्याः पादः तथा अष्टाक्षरविशिष्टाः भवन्ति, तर्हि तत्रापि षट्त्रिंशदक्षरविशिष्टा (8+12+8+8 = 36) **न्यङ्कुसारिणी-बृहती** भवति । तदर्थं सूत्रितं ***न्यङ्कुसारिणी द्वितीयः***[36] इति । यथा – *मत्स्यपायि (मत्सियपायि) ते महः* (8) *पात्रस्येव हरिवो मत्सरो मदः* (12) । *वृषा ते वृष्ण इन्दु*- (*वृष्णे इन्दु* – *वृष्णये इन्दु*) (8) *वाजी सहस्रसातमः* (8) (ऋ. – 1.175.1) इति ।

---

[32] पिङ्ग. – 3.26
[33] पिङ्ग. – 3.33
[34] पिङ्ग. – 3.34
[35] पिङ्ग. – 3.27
[36] पिङ्ग. – 3.28

इयमेव न्यङ्कुसारिणी क्रौष्टुकेराचार्यस्य मतेन स्कन्धोग्रीवी नाम बृहती छन्दो भवति। ***स्कन्धोग्रीवी क्रौष्टुकेः*** [37] इति हि सूत्रम्। यास्काचार्यमते सा न्यङ्कुसारिणी उरोबृहती-इति नाम्ना परिचीयते। सूत्रितं तर्हि ***उरोबृहती यास्कस्य*** [38] इति॥

**ग) उपरिष्टात्-बृहती** – यदा जागतः पादः (द्वादशाक्षरः) अन्ते भवति, अवशेषाश्च गायत्र्याः पादाः (अष्टाक्षरः) तदा षट्त्रिंशदक्षरविशिष्टा (8+8+8+12 = 36) **उपरिष्टात्-बृहती** भवति । तदर्थं सूत्रितं ***उपरिष्टाद्बृहत्यन्ते*** [39] इति। यथा – *अग्ने जरितर्विश्पति* (8) *स्तेपानो देवरक्षसः* (8)। *अप्रोषिवान् गृहपति-* (8) *र्महाँ असि दिवस्पायुर्दुरोणयुः* (12) (ऋ. – 8.60.19), (साम. – 1.39) इति॥

**घ) पुरस्तात्-बृहती** - यदा जागतः पादः (द्वादशाक्षरः) पूर्वे भवति, अवशेषाश्च गायत्र्याः पादाः (अष्टाक्षरः) तदा षट्त्रिंशदक्षरविशिष्टा (12+8+8+8 = 36) **पुरस्ताद्-बृहती** भवति । तदर्थं सूत्रितं ***पुरस्ताद्बृहती पुरः*** [40] इति। ***बृहती जागतस्त्रयश्च गायत्र्याः*** [41] इति सूत्रेण यदा एको जागतः (द्वादशाक्षरः) पादः, त्रयश्च गायत्र्याः (अष्टाक्षरः) पादाः, तदा षट्त्रिंशदक्षरविशिष्टा (12+8+8+8 = 36) बृहतीछन्दो भवतीति । परन्तु ***पुरस्ताद्बृहती पुरः*** इति सूत्रेण षट्त्रिंशदक्षरविशिष्टायाः (12+8+8+8 = 36) बृहत्याः नामकरणं कृतं **पुरस्ताद्-बृहती** इति । तदुच्यते ***बृहती-जागतः त्रयश्च गायत्र्याः*** (3.26) *इत्यनेनैव गतार्थत्वात् संज्ञाविशेषप्रदर्शनार्थमिदं पुनरुच्यते* [42] इति। यथा – *महो यस्पतिः शवसो असाम्या* (*असामिया*) (12) *महो नृम्णस्य तूतुजिः* (8)। *भर्त्ता वज्रस्य* (*वज्रसिय*) *धृष्णोः* (8) *पिता पुत्रमिव प्रियम्* (8) (ऋ. – 10.22.3) इति॥

**ङ) महा-बृहती सतोबृहती वा** – त्रिभिर्जागतैः (द्वादशाक्षरैः) पादैः षट्त्रिंशदक्षरविशिष्टा (12+12+12 = 36 /12x3 = 36) या बृहती सा एव महाबृहती इति। तदर्थं सूत्रितं – ***त्रिभिर्जागतैर्म्महाबृहती*** [43] इति। सा महाबृहती ताण्डिन आचार्यस्य मतेन सतोबृहती-नाम्ना वेदितव्या। तदर्थमुक्तम् ***सतोबृहती ताण्डिनः*** [44] इति। यथा - *अजीजनः अमृतः मर्त्येष्वा* (मर्त्येषु आ = *मर्तियेषु आ*) (12), *ऋतस्य धर्मन् अमृतस्य चारुणः* (12)। *सदासरो वाजमच्छा सनिष्यदत्* (12) (ऋ. – 10.110.4) इति॥

---

[37] पिङ्ग. – 3.29

[38] पिङ्ग. – 3.30

[39] पिङ्ग. – 3.31

[40] पिङ्ग. – 3.32

[41] पिङ्ग. – 3.26

[42] पिङ्ग. – 3.32 (भाष्यम्)

[43] पिङ्ग. – 3.35

[44] पिङ्ग. – 3.36

I J A M S R
**International Journal of**
**Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

कोष्ठेनैकेन बृहतीछन्दसः एते विभागाः ससूत्रोदाहरणं प्रदर्श्यन्ते –

| नाम | लक्षणम् | अक्षरसंख्या | उदाहरणम् |
|---|---|---|---|
| पथ्या-बृहती | *पथ्या पूर्वश्चेत्तृतीयः* | 8+8+12+8 = 36 | *मा चिदन्यद्वि शंसत* (8) *सखायो मा रिषण्यत* (8)। *इन्द्रमित् स्तोता वृषणं स चासुते* (12) *मुहुरुक्था च शंसत* (8)॥ |
| न्यङ्कुसारिणी-बृहती / स्कन्धोग्रीवी-बृहती / उरोबृहती | *न्यङ्कुसारिणी द्वितीयः, स्कन्धोग्रीवी क्रौष्टुकेः, उरोबृहती यास्कस्य* | 8+12+8+8 = 36 | *मत्स्यपायि (मत्सियपायि) ते महः* (8) *पात्रस्येव हरिवो मत्सरो मदः* (12)। *वृषा ते वृष्ण इन्दु- (वृष्णे इन्दु – वृष्णये इन्दु)* (8) *वाजी सहस्रसातमः* (8)॥ |
| उपरिष्टात्-बृहती | *उपरिष्टाद्बृहत्यन्ते* | 8+8+8+12 = 36 | *अग्ने जरितर्विश्पति* (8) *स्तेपानो देवरक्षसः* (8)। *अप्रोषिवान् गृहपति-* (8) *र्महाँ असि दिवस्पायुर्दुरोणयुः* (12)॥ |
| पुरस्ताद्-बृहती | *पुरस्ताद्बृहती पुरः* | 12+8+8+8 = 36 | *महो यस्पतिः शवसो असाम्या (असामिया)* (12) *महो नृम्णस्य तूतुजिः* (8)। *भर्त्ता वज्रस्य (वज्रसिय) धृष्णोः* (8) *पिता पुत्रमिव प्रियम्* (8)॥ |
| महाबृहती / सतोबृहती | *त्रिभिर्जागतैर्म्महाबृहती, सतोबृहती ताण्डिनः* | 12+12+12 = 36 /12x3 = 36 | *अजीजनः अमृतः मर्त्येष्वा (मर्त्येषु आ = मर्तियेषु आ)* (12), *ऋतस्य धर्मन् अमृतस्य चारुणः* (12)। *सदासरो वाजमच्छा सनिष्यदत्* (12)॥ |

**International Journal of**
**Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

**ऋक्प्रातिशाख्यस्य- पिङ्गलच्छन्दःसूत्रवर्णितस्य बृहतीछन्दसः तुलनात्मकं समीक्षणम् –**

इदानीम् ऋक्प्रातिशाख्यस्य षोडशपटलस्थितेन बृहती-छन्दसा सह पिङ्गलच्छन्दःसूत्रस्थितस्य बृहती-छन्दसः तुलनात्मकं समीक्षणं निरूप्यते –

**क)** ऋक्प्रातिशाख्यानुसारेण बृहतीछन्दसो **सप्तविभागाः** सन्ति। तद्यथा – **पुरस्ताद्बृहती, उपरिष्टाद्बृहती, न्यङ्कुसारिणीबृहती** अथवा **स्कन्धोग्रीवीबृहती** अथवा **उरोबृहती, विराट् ऊर्ध्वोबृहती, विष्टारबृहती, पिपीलिकमध्यमाबृहती, विषमपदाबृहती** इति। पिङ्गलच्छन्दःसूत्रानुसारेण बृहतीछन्दसो **पञ्चविभागाः** निरूपिताः । तद्यथा – **पथ्या-बृहती, न्यङ्कुसारिणी-बृहती अथवा स्कन्धोग्रीवी-बृहती अथवा उरोबृहती, उपरिष्टात्-बृहती, पुरस्तात्-बृहती, महाबृहती** इति।

**ख)** ऋक्प्रातिशाख्ये **चतुस्त्रिंशदक्षरविशिष्टा** (पिपीलिकमध्यमा-बृहती) बृहती निरूपिता । परन्तु पिङ्गलच्छन्दःसूत्रे केवलं **षट्त्रिंशदक्षरविशिष्टा** बृहती निरूपिता।

**ग)** उभयेऽस्मिन् ग्रन्थे षट्त्रिंशदक्षरविशिष्टा न्यङ्कुसारिणी निरूपिता। तस्याः नामद्वयमपि उल्लिखितं उभयेऽस्मिन् ग्रन्थे । न्यङ्कुसारिणी – बृहत्याः नामनी एव **स्कन्धोग्रीवी, उरोबृहती** चेति । परन्तु ऋक्प्रातिशाख्ये आचार्ययोः नामनी नास्ति । ययोर्मतेन नामानुसारेण वा एतादृशं नामकरणं विहितम् । केवलमुक्तम् *आचार्याणां मते* इति । किन्तु पिङ्गलच्छन्दःसूत्रे उक्तम् – इयमेव न्यङ्कुसारिणी **क्रौष्टुकेराचार्यस्य** मतेन **स्कन्धोग्रीवी** नाम बृहती-छन्दो भवति। ***स्कन्धोग्रीवी क्रौष्टुकैः*** [45] इति हि तत्र सूत्रम् । **यास्काचार्यमते** सा न्यङ्कुसारिणी **उरोबृहती**-इति नाम्ना परिचीयते। सूत्रितं तर्हि ***उरोबृहती यास्कस्य*** [46] इति।

**घ)** ऋक्प्रातिशाख्ये या एव विराट्-ऊर्ध्वोबृहती (12+12+12=36) सा एव पिङ्गलच्छन्दःसूत्रे महाबृहती (12+12+12=36) इति । पिङ्गलच्छन्दःसूत्रानुसारेण सा एव महाबृहती **ताण्डिन** आचार्यस्य मतेन **सतोबृहती** नाम्ना व्यपदिश्यते। तदर्थमुक्तम् – ***सतोबृहती ताण्डिनः*** [47] इति॥

[45] पिङ्ग. – 3.29

[46] पिङ्ग. – 3.30

[47] पिङ्ग. – 3.36

Vol 8, Issue 5, 2025 **Impact Factor: 8.535** DOI: https://doi.org/10.31426/ijamsr.2025.8.5.8318

IJAMSR

**International Journal of Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

**उपसंहारः** –

शौनकाचार्यविरचितस्य अष्टादशपटलात्मकस्य ऋक्प्रातिशाख्यस्य षोडश-सप्तदश-अष्टादश-पटले वैदिकछन्दोविषये आलोचना समुपलभ्यतेऽस्माभिः। पटलत्रयस्य नाम एव छन्दःपटलम् इति। वैदिकसाहित्ये छन्दःशास्त्रस्योपरि अतीव महत्त्वपूर्णो ग्रन्थ एव आचार्यपिङ्गलविरचितः *पिङ्गलच्छन्दःसूत्रम्*। द्वयोः ग्रन्थयोः गायत्र्यादीनि सप्त छन्दांसि सलक्षणानि सोदारहणानि आलोचितानि। द्वयोर्ग्रन्थयोरेतयोः परिवेशितेषु सप्तसु छन्दसु बृहतीछन्दसः तुलनात्मकमध्ययनम् एव गवेषणापत्रस्यास्य विषय एव।

न केवलमृक्प्रातिशाख्ये अपि तु शाङ्ख्यायनश्रौतसूत्रे, सामवेदस्य निदानसूत्रे, पिङ्गलच्छन्दःसूत्रे च छन्दोविषयः सोपपत्तिकं प्रतिपादितोऽस्ति। कात्यायनस्य सर्वानुक्रमण्यामपि छन्दोविषये बहुप्रतिपादितमस्ति। वस्तुतः पिङ्गलच्छन्दःसूत्रं तु वैदिकलौकिकच्छन्दसोः सन्धिस्थलम्। तत्र हि पूर्वार्धे वेदप्रयुक्तच्छन्दसां विवेचनमस्ति, उत्तरार्धे तु लौकिकच्छन्दसामेव। छन्दाःसाहित्ये पिङ्गलसूत्रमेव प्रथमार्षग्रन्थरत्नम्। ततश्च केदारभट्टस्य वृत्तरत्नाकरः षट्सु अध्यायेषु निबद्धोऽस्ति, गङ्गादासस्य छन्दोमञ्जरी षड्भिः स्तवकैर्निबद्धा, क्षेमेन्द्रस्य सुवृत्ततिलकम्, हेमचन्द्रस्य छन्दोऽनुशासनञ्चेति केचन ख्याताश्छन्दोविषयकग्रन्थाः। इत्थं छन्दःसाहित्यमपि वेदस्य पादत्वेन सम्मतं सुविपुलं सुस्पष्टञ्चेति।

जयदेव-विरचिते (850 ख्री.) **जयदेवछन्दः -** इति ग्रन्थेऽपि वैदिकछन्दांसि व्याख्यातानि। ग्रन्थस्यास्य अष्टाध्यायाः सन्ति। तत्र प्रथमाध्याये लघु-गुरु-वर्ण-गण-यतीत्यादीनां विवेचनमस्ति। द्वितीयाध्याये तृतीयाध्याये च वैदिकछन्दसां विवेचनमस्ति। चतुर्थतः सप्तमाध्यायपर्यन्तं लौकिकछन्दसां व्याख्या विहिता। अष्टमे च छन्दःप्रस्तारप्रक्रिया वर्णिता।

वैदिकच्छन्दसां चर्चा अग्नि-गरुड-नारद-विष्णुपुराणेषु अपि विहिता। अग्निपुराणस्य 328 अध्यायतः 335 अध्याययावत् छन्दविषयकालोचना विहिता। एतेष्वध्यायेषु प्रथम-द्वितीय-तृतीयाध्याये वैदिकच्छन्दांसि आलोचितानि। अवशिष्टेषु लौकिकछन्दांसि विहितानि। विष्णुधर्मोत्तरपुराणस्य तृतीयखण्डान्तर्जतस्य तृतीयाध्याये गायत्रीतः कृति-पर्यन्तानां छन्दसां सामान्यलक्षणं विहितम्। नारदपुराणस्य सप्तपञ्चाशत्तमेऽध्याये[48] वैदिक-लौकिक-छन्दांसि विहितानि। अस्माभिर्ज्ञायते यत् ऋक्प्रातिशाख्ये छन्दसां प्रथम-द्वितीय-तृतीय-वर्गाः सन्ति। भरताचार्यप्रणीते **नाट्यशास्त्रम्** इति ग्रन्थे वर्गत्रयस्यैतस्य यथाक्रमेण दिव्य-दिव्येतर-दिव्यमानुष इति संज्ञा विधीयते।[49] महर्षिभर्तृहरि-विरचिते **वाक्यपदीयम्** इति ग्रन्थस्य ब्रह्मकाण्डे

---

[48] नार. – 57.1-21

[49] नाट्य. – 15.99 (क)

उच्यते छन्दोभ्य एव ***प्रथममेतद्विश्वं व्यवर्तत*** [50] इति। निखिलमिदं विश्वं खलु छन्दसो विवर्तमिति। ऋच्यध्यूढं साम गीयते इति वैदिकसिद्धान्तानुसारेण छन्दोयुक्तया ऋचा गानं क्रियते। अत एव साङ्गीतिकदृष्ट्या संस्कृतभाषया छन्दोबद्धानां पद्यानां लयात्मकता अतिमहत्त्वपूर्णास्ति इति॥

**शब्दसंक्षेपसूची** –

उ. – उणादिसूत्रम्
उ.भा. – उवटभाष्यम्
ऋक्प्रा. - ऋक्प्रातिशाख्यम्
ऋक्सर्वा. – ऋक्सर्वानुक्रमणी
तै.स. – तैत्तिरीयसंहिता
दै.ब्रा. – दैवतब्राह्मणम्
नाट्य. – नाट्यशास्त्रम्
नार. – नारदपुराणम्
नि. – निरुक्तम्
पा. – पाणिनिः
पा.शि. – पाणिनीयशिक्षा
पिङ्ग. – पिङ्गलच्छन्दःसूत्रम्
मनु. – मनुस्मृतिः
वाक्य. – वाक्यपदीयम्

**ग्रन्थपञ्जी** –

*अष्टाध्यायी* । चन्द्रलेख ा हिन्दीव्याख्यायुताऽनेकोपयोगिविषयैरूपबृंहिता सूत्रपाठ-सूत्रवार्तिकोदाहरणानां सूच्या चान्विता। मदर्षि-पाणिनिः। व्याख्याकारः- ईश्वरचन्द्रः। प्रथम-द्वितीयभागः, व्रजजीवन प्राच्यभारती ग्रन्थमाला १०३, दिल्लीः चोखम्बा संस्कृत प्रतिष्ठान, २००४.

*ऋग्वेदप्रातिशाख्यम्*, उवट-भाष्य-सहितम्। सम्पा. सिद्धेश्वर-भट्टाचार्यः। काशी हिन्द ू विश्वविद्यालय संस्कृत ग्रन्थमाला। शोध-प्रकाशन-योजना। पञ्चम-पुष्पः, वाराणसी : काशी हिन्द ू विश्वविद्यालय शोध-प्रकाशन, १९३०।

*ऐतरेयब्राह्मणम्*, सायणाचार्यकृत - *वेदार्थप्रकाश*-नामभाष्येण-सहितम्, *सरला* - रूपया हिन्दीव्याख्यया चोपेतम्। सम्पादकोऽनुवादकश्च - सुधाकर-मालवीयः। प्रथमभागः – प्रथमतश्चतुर्थपञ्चिकान्तः। प्राच्यभारतीयग्रन्थमाला - १४. वाराणसी : तारा प्रिंटिंग हाउस, १९८०।

*छन्दःशास्त्रम्*, पिङ्गलनागविरचितम्। हलायुधभट्टविरचितया मृतसञ्जीवन्याख्यया वृत्त्यया समेतम्, समीक्षाचक्रवर्तिराजपण्डितश्रीमधुसूदनविद्यावाचस्पतिरचित - छन्दोनिरुक्तिसनाथीकृतं च। परि मल संस्कृत ग्रन्थमाला संख्या – ६। दिल्ली : परिमल पब्लिकेशन्स, १९८५ (पुनर्मुद्रितसंस्करणम्)।

[50] वाक्य. – 1.120

I J A M S R
**International Journal of**
**Advanced Multidisciplinary Scientific Research (IJAMSR) ISSN:2581-4281**

*छन्दशास्त्र का उद्भव एवं विस्तार* । सम्पा. – श्रीकिशोर मिश्र । विश्वविद्यालय-रजतजयन्ती-ग्रन्थमाला – 44 । वारानसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय, 2006.

*तैत्तिरीयसंहिता*, दामोदर-सातवलेकरः । पारडी : स्वाध्यायमण्डलम्, १९४३ (चतुर्थसंस्करणम्) ।

*पाणिनीयशिक्षा*, व्याख्याकारः शिवराज आचार्यः कौण्डिन्न्यायनः । सम्पादकः - आमोदवर्धनः कौण्डिन्न्यायनः, प्रमोदवर्धनः कौण्डिन्न्यायनः, सुमोदवर्धनः कौण्डिन्न्यायनः । विद्याभवन - प्राच्यविद्या - ग्रन्थमाला - ८९, वाराणसी : चौखम्बा विद्याभवन, २००४ (पुनर्मुद्रितसंस्करणम्) ।

*पिङ्गलछन्दःसूत्रम्*, यादव प्रकाशप्रणीतेन - पिङ्गलछन्दोविचितिभ◌ाष्येण समुपेतम् । सम्पा. विजयपालः । कलक◌ात◌ा : श्रीमती सावित्री देवी बागड़िया ट्रस्ट - १९८८ ।

*पिङ्गलच्छन्दःसूत्रम्*, हलायुधभट्टकृतवृत्त्या टिप्पन्या वङ्गानुवादेन हिन्दीभाषानुवादेन च समलङ्कृतम् । सम्पा.- सीतानाथसामाध्यायि - भट्टाचार्यः। अमरकुमार-चट्टोपाध्यायेन च परिदृष्टम् । कलिकाता : संस्कृत पुस्तक भाण्डार, २००१ ।

*पिङ्गलकृतं छन्दःसूत्रम् वैदिक गणितीय अनुप्रयोगों सहित* (*The Prosody of Pingala, A Treatise of Vedic and Sanskrit Metrics with applications of Vedic Mathematics*). कपिलदेव-द्विवेदी, श्यामलाल-सिंहश्च । वाराणसी : विश्वविद्यालय प्रकाशन, २०१९ ।

*The Studies in Chandahsastra*. Ed. Bhagyalata Pataskar. Pune: Vedic Samshodhana Mandala (Adarsha Sanskrit Shodha Samstha), 2012.

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~